संस्कृतवार्ताः

03/08/2025

सायम्  - 06:20

<u>मुख्यवार्ता:</u>

· अद्य गुजरातस्य भावनगर-रेलस्थानकात् भावनगर-अयोध्या छावनी इत्यस्य साप्ताहिक-रेलयानस्य उद्घाटनमकरोत् रेलमंत्री अश्विनी वैष्णवः। रेवा-पुणे नगरयो: जबलपुर रायपुर नगरयोः मध्ये च अन्यद्वयं रेल-यानम् अपि समुद्घाटितवान् असौ।

· उत्तरप्रदेशस्य गोण्डानगरे मार्गदुर्घटनायां न्यूनातिन्यूनं एकादश जना: मृताः, अन्ये चत्वारः जनाः च व्रणिताः।

· दीनदयाल-नौकाश्रय-प्राधिकरणेन कन्दलाया: नौकाश्रयक्षेत्रे भारतस्य प्रथमं मेक्-इन्-इण्डिया-हरित-हैड्रोजन्-संयंत्रं प्रारब्धम्।

· भारतीय ऋतु-विज्ञान विभागेन अरुणाचल प्रदेश, असम, मेघालय सिक्किम, उप-हिमालय-पश्चिमवङ्ग इत्येतेषु प्रदेशेषु अति प्रचण्डवृष्टे: पूर्वानुमानं विहितम्।

· क्रिकेट क्रीडायां भारतेन चतु:सप्तत्यधिक त्रिशत-धावनांकाना प्रदत्तस्य बृहत्-लक्ष्यस्य अनुसरणं कुर्वत् इंग्लैंड-दलं भारत इंग्लैण्ड दलयोर्मध्ये प्रचालितस्य पञ्चमान्तिमस्य टेस्ट क्रीडाया: चतुर्थेदिने अन्तिम सूचना प्राप्तिं यावत् इंग्लैण्ड दलं चतुषष्ठ्यधिकैकशत धावनांके आसीत्।

<u>अश्विनी वैष्णवः गुजरात</u>

रेलमंत्री अश्विनी वैष्णवः अद्य गुजरातस्य भावनगर-रेलस्थानकात् भावनगर-अयोध्या छावनी इत्यस्य साप्ताहिक-रेलयानस्य उद्घाटनं विहितवान्। मन्त्री रेवा-पुणे नगरयो: जबलपुर रायपुर नगरयोः मध्ये च अन्यद्वयं रेल-यानम् अपि समुद्घाटितवान्। मन्त्री अवोचत् यत् गत एकादश वर्षेषु चतु: त्रिंशत् सहस्त्र किलोमीटर यावत् नूत्ना: रेल्मार्गाः स्थापिताः, भारतीय-रेल-याने अविरतं परिवर्तनं विधीयते। भावनगर-रेल्-स्थानके जनसमूहं सम्बोधयन्, सः रेल नेटवर्क इत्यस्य विकासाय, आधुनिकीकरणाय, विस्ताराय च, रेलयाने सुरक्षां स्वच्छतां च सुनिश्चेतुं सर्वकारस्य

प्रतिबद्धतां पुनः दृढीकृतवान्। मन्त्री प्रत्यपादयत् यत् देशे त्रयोदशशत स्थानकानां पुनर्विकासः विश्वस्य बृहत्तमा स्थानक-पुनर्विकास-परियोजना अस्ति इति।

अवसरेऽस्मिन् केन्द्रीयमन्त्री मनसुख माण्डवीया, निमु बेन बम्भानिया च उपस्थितौ आस्ताम्। मध्यप्रदेशस्य मुख्यमन्त्री मोहन यादवः, छत्तीसगढस्य मुख्यमन्त्री विष्णुदेवसाई च कार्यक्रमेऽस्मिन् आभासीयरूपेण भागम् अग्रहीष्टाम्। अस्मिन् अवसरे रेलमन्त्री गुजरातस्य कृतेऽपि घोषणाः अकरोत्।

राजकोट, पोरबन्दर, जुनागढ इत्येतेषु मण्डलेषु मूलसौकर्याणां कृते महत्त्वपूर्णं प्रोत्साहनं कृत्वा, पोरबन्दर-राजकोट इत्येतयोः मध्ये नूत्नाः रेल-सेवाः घोषिताः। एतदतिरिच्य, मन्त्री भावनगर-नौकाश्रये नूतनस्य कंटेनर्-टर्मिनल् इत्यस्य स्थापनायाः घोषणाम् अपि कृतवान्, आगामिषु कालेषु भावनगर-सूरत्-नगरयोः मध्ये नूतनं वंदेभारत-रेलयानम् आरभेत इति प्रतिज्ञां कृतवान्।

<u>यूपी - दुर्घटना :</u>

उत्तरप्रदेशे अद्य प्रातः गोण्डानगरे मार्गदुर्घटनायां न्यूनातिन्यूनं एकादश जना: मृता:, अन्ये चत्वारः जनाः व्रणिताः। आरक्षि अनुसारं पृथ्वीनाथमन्दिरं प्रति गच्छत् पञ्चदश भक्तान् वहत् एकं बोलेरो यानम् अनियन्त्रितं भूत्वा रेहरा ग्रामे सरयू नहरसेतो: समीपे परसराय अलावल देवरिया मार्गात् जल-कुल्यायां पतितम्। गोण्डा- आरक्षि अधीक्षकः विनीतजयसवालः वार्ताहरान् उक्तवान् यत् जलकुल्या तः एकादश शवाः प्राप्ताः।

प्रधानमन्त्री नरेन्द्रमोदी हृदयविदारिकायां दुर्घटनायां प्राणहानिविषये दुःखं प्रकटितवान्। जनसंचार संदेशे श्रीमोदी दुर्घटनायां ये जनाः स्वप्रियजनेभ्य: विप्रयुक्ता: तान् प्रति शोकं प्रकटितवान्। सः आशां प्रकटिवान् यत् व्रणिताः शीघ्रमेव स्वस्थाः भविष्यन्ति। प्रधानमन्त्रिणा उक्तं यत्, प्रत्येकस्य मृतस्य परिजनाय प्रधानमंत्री राष्ट्रिय आपत् कोषात् द्वि लक्षरूप्यकाणां अनुग्रहः प्रदत्तः भविष्यति तत्रैव व्रणितानाम् कृते पञ्चाशत् सहस्ररूप्यकाणि प्रदत्तानि भविष्यन्ति। मुख्यमन्त्री योगी आदित्यनाथः अपि दुर्घटनायां दुःखं प्रकटितवान्, मृतकानां परिवारेभ्यः पञ्चलक्षरूप्यकाणां अनुग्रह राशेः च घोषणां कृतवान्।

## पीएम कन्दला

कन्दला नगरस्य दीनदयाल-नौकाश्रय-प्राधिकरणेन कन्दला-नगरस्य नौकाश्रयक्षेत्रे भारतस्य प्रथमं मेक्-इन्-इण्डिया-हरित-हैड्रोजन्-संयंत्रं प्रारब्धम्। प्रधानमन्त्री-नरेन्द्र-मोदी-वर्यस्य नेट-ज़ीरो-विज़न् प्रति इयं प्रबल पदयात्रा वर्तते इति नौकाश्रय-प्राधिकरणम् स्पष्टयति। एकस्मिन् जन संचार पटले श्रीमोदी प्रत्यपादयत् यत्, एषः प्रशंसनीयः प्रयासः , सुस्थिरतां च समर्थयति, नेट-ज़ीरो-विज़न् इत्यस्मै शक्तिं च यच्छति।

## भारतीय ऋतु-विज्ञान

भारतीय ऋतु-विज्ञान विभागेन अरुणाचल प्रदेश, असम, मेघालय सिक्किम, उप-हिमालय-पश्चिमवङ्ग इत्येतेषु प्रदेशेषु अति प्रचण्डवृष्टेः पूर्वानुमानं विहितम्। बिहार, पूर्व-उत्तर प्रदेश, , केरल, माहे, तमिलनाडु, पुदुचेरी, करैकले च अति वृष्टेः पूर्वानुमानं विभागेनानेन कृतम्। गुजरात, केरल, उत्तराखण्डस्य च अनेकेषु मण्डलेषु नारङ्गीया सूचना प्रख्यापिता। विभागेन अद्य शिमला, सोलन, सिर्मौर इत्येतेषु मण्डलेषु प्रचण्डवृष्टेः कृते पीत संचेतना प्रदत्ता।

## जपान-भारत (विश्व प्रदर्शनी)

जपान्-देशे, ओसाका-नगरे आयोजितायां पंचविशत्युत्तर द्विसहस्र तमवर्षस्य विश्व-प्रदर्शन्यां भारत-मण्डपः इति शीर्षकः ह्यः विंशतिः सहस्र तः अधिकान् अभ्यागतान् आकर्षयत्, यतः जनाः भारतस्य सांस्कृतिकपरम्परायाः हस्तशिल्पस्य च समृद्धिं द्रष्टुं आगच्छन्। प्रदर्शन्यां अन्येषु आकर्षणेषु 'चन्द्रयान्-क्षेत्रम्' अन्तर्भवति, यत् अन्तरिक्ष-अन्वेषणे भारतस्य प्रवर्तक-उपलब्धीः, तस्य चन्द्र-अभियानानि च प्रदर्शयति। एषा अन्यतमा प्रदर्शनी भारतस्य मृदुशक्तिं प्रदर्शयति, बहुध्रुवीयविश्वे तस्य पदचिह्नानि स्थापयति। अस्मिन् प्रदर्शने षष्ठ्यधिकैकशत तः अधिकाः देशाः, नव अन्ताराष्ट्रियसंस्थाः च भागम् अगृह्णन्।

गडकरी- इन्फ्रा-नेतृत्वेन अर्थव्यवस्था :

केन्द्रीयपरिवहनराजमार्गमन्त्रिणा नितिनगडकरिणा घोषितं यत् आगामिवर्षद्वये आन्ध्रप्रदेशस्य मार्गाः अमेरिकीय मार्गसदृशाः भविष्यन्ति। ह्यः आन्ध्रप्रदेशस्य मङ्गलागिरीनगरे सप्तविंशति मार्गविकासपरियोजनानां आधारशिलास्थापनं कृत्वा त्रयस्त्रिंशोत्तर द्विशताधिक पञ्चसहस्रकोटिरूप्यकाणां सम्पन्नद्वयोः परियोजनयोः राष्ट्राय समर्पणानन्तरं मुख्यमन्त्रिणा एन. चन्द्रबाबू नायडूना सह एकं उपवेशनं संबोधयन् तेनोदीरितं यत् नवपरियोजनाभिः आन्ध्रप्रदेशं तेलंगाना कर्णाटक ओडिशा तमिलनाडु राज्यं च निकटतया संयोजयिष्यते। केन्द्रीयमन्त्री घोषितवान् यत् विजयवाडा-हैदराबाद-मार्गस्य विकासः राजमार्गरूपेण भविष्यति, येन द्वयोः नगरयोः मध्ये यात्रायाः समयः केवलं द्विहोरा यावत् भविष्यति।

क्रिकेट

क्रिकेट क्रीडायां भारतेन चतु:सप्तत्यधिक त्रिशत-धावनांकाना प्रदत्तस्य बृहत्-लक्ष्यस्य अनुसरणं कुर्वत् इंग्लैंड-दलं लन्दननगरस्य ओवल क्रीडांग्णे भारत इंग्लैण्ड दलयोर्मध्ये प्रचालितस्य पञ्चमान्तिमस्य टेस्ट क्रीडाया: चतुर्थेदिने अन्तिम सूचना प्राप्तिं यावत् इंग्लैण्ड दलं चतुषष्ठ्यधिकैकशत धावनांके आसीत्। तै: विजयाय अधुनाऽपि दशाधिकद्विशत धावनांकानामावश्यकता वर्तते।

।। इति वार्ता: ।।